# Shri Lakshmya Ashtakam

# શ્રીલક્ષ્મ્યષ્ટકમ્

## Document Information

Text title : Shri Lakshmya Ashtakam 2

File name : lakShmyaShTakam2.itx

Category : devii, aShTaka, lakShmI

Location : doc_devii

Proofread by : Vani V., Rajani Arjun Shankar

Description/comments : ahirbudhnyasaMhitA

Latest update : August 2, 2023

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

August 2, 2023

*sanskritdocuments.org*

# Shri Lakshmya Ashtakam

## શ્રીલક્ષ્મ્યષ્ટકમ્

મહાલક્ષ્મિ ભદ્રે પરવ્યોમ-વાસિ-
ન્યનન્તે સુષુમ્નાહ્વયે સૂરુજુષ્ટે ।
જયે સૂરિતુષ્ટે શરણ્યે સુકીર્તે
પ્રસાદં પ્રપન્ને મયિ ત્વં કુરુષ્વ ॥ ૧॥

સતિ સ્વસ્તિ તે દેવિ ગાયત્રિ ગૌરિ
ધ્રુવે કામધેનો સુરાધીશ-વન્દ્યે ।
સુનીતે સુપૂર્ણેન્દુ-શીતે કુમારિ
પ્રસાદં પ્રપન્ને મયિ ત્વં કુરુષ્વ ॥ ૨॥

સદા સિદ્ધ-ગન્ધર્વ-યક્ષેશ-વિદ્યા
ધરૈઃ સ્તૂયમાને રમે રામ રામે ।
પ્રશસ્તે સમસ્તામરી-સેવ્યમાને
પ્રસાદં પ્રપન્ને મયિ ત્વં કુરુષ્વ ॥ ૩॥

દુરિતૌઘ-નિવારણે પ્રવીણે
કમલે ભાસુર-ભાગધેય-લભ્યે ।
પ્રણવ-પ્રતિપાદ્ય-વસ્તુરૂપે
સ્ફુરણાખ્યે હરિવલ્લભે નમસ્તે ॥ ૪॥

સિધ્યે સાધ્યે મન્ત્રમૂર્તે
વરેણ્યે ગુપ્તે દૃપ્તે નિત્યમુદ્ગીથવિદ્યે ।
વ્યક્તે વિદ્યદ્ભાવિતે ભાવનાખ્યે
ભદ્રે ભદ્રં દેહિ મે સંશ્રિતાય ॥ ૫॥

સર્વાધારે સદ્વ્રતેઽધ્યાત્મવિદ્યે
ભાવિન્યર્થ-નિર્વૃતેઽધ્યાત્મવલ્લી ।
વિશ્વાધ્યક્ષે મઙ્ગલાવાસભૂમે
ભદ્રે ભદ્રં દેહિ મે સંશ્રિતાય ॥ ૬॥

અમોઘસેવે નિજ-સદ્ગુણૌઘે
    વિદીપિતાનુશ્રવ-મૂર્ધભાગે ।
અહેતુમીમાંસ્ય-મહાનુભાવે
    વિલોકને માં વિષયી-કુરુષ્વ ॥ ૭॥

ઉમા-શચી-કીર્તિ-સરસ્વતી-ધી-
    સ્વાહાદિ-નાનાવિધ-શક્તિભેદે ।
અશેષ-લોકાભરણ-સ્વરૂપે
    વિલોકને માં વિષયી કુરુષ્વ ॥ ૮॥

ઇતિ શ્રીઅહિર્બુધ્ન્યસંહિતાયાં શ્રીલક્ષ્મ્યષ્ટકં સમ્પૂર્ણમ્ ।

Proofread by Vani V., Rajani Arjun Shankar

*Shri Lakshmya Ashtakam*

pdf was typeset on August 2, 2023

Please send corrections to *sanskrit@cheerful.com*